# मम पुस्तकम्

नाम - ______________________

पत्र-सङ्केतः - ______________________

______________________

चल-दूरवाणी-सङ्ख्या - ______________________

# १३ अङ्कीय-साक्षरता

**वयं ज्ञास्यामः**

- अङ्कीय-सङ्ख्यानाम् अवगमनं लेखनं च ।
- चित्रे प्रदर्शितस्य सङ्ख्यात्मक-विवरणस्य ज्ञानम् ।
- नित्यजीवने चलदूरवाण्या संबद्धानां समस्यानां परिहारम् ।

## मार्गः सुगमः सञ्जातः

सोमनाथः जामनगरे वसति । सः कृषिकार्यं करोति ।

तस्य ८.२ एकर्-परिमिता भूमिः अस्ति । तस्य त्रयः बालाः सन्ति – एकः पुत्रः पुत्रीद्वयं च । ते सर्वे विद्यालये पठन्ति । सोमनाथः षष्ठकक्ष्यां यावत् विद्यालयं गतवान् । बालाः सम्यक् अध्ययनं कुर्युः इति सः इच्छति । तेषाम् अध्ययनार्थं सः ऋणं स्वीकृत्य एकां चलदूरवाणीम् अपि क्रीतवान् । बालान् पालयितुं सोमनाथः तस्य पत्न्या सह अतीव परिश्रमं करोति । सः गते वर्षाकाले व्रीहेः कृषिं शीतकाले च गोधूमस्य कृषिं कृतवान् । सोमनाथः कृषिकार्यस्य आरम्भात् पूर्वं सम्पूर्णां



योजनां कृतवान् । यथा – बीजानां क्रयणम्, क्षेत्रनिमित्तं सारस्य सङ्ग्रहणम् इत्यादि । तेन पुनः पुनः जलसेचनार्थं जलयन्त्रं भाटकरूपेण स्वीकरणीयम् आसीत् । तदर्थं धनम् अपि अपेक्षितम् आसीत् । कार्यार्थं सः कर्मकरान् अपि नियोजयितुम् इच्छति स्म । अतः सोमनाथः आय-व्यय-योजनां कृतवान् ।

स्रोत:*https://play.google.com/store/apps/details?id=in.farmguide.farmerapp.central&hl=en_IN&gl=US*

किन्तु तस्मिन् तावद् धनं न आसीत् यावत् वस्तुतः अपेक्षितं भवति ।




स्रोत: https://mkisan.gov.in/

अतः पूर्वतन-वर्षस्य अवशिष्टम् अपि धनम् अत्र निवेशनीयं एवं च ग्रामीण-वित्तकोषात् ऋणं स्वीकर्तव्यम् इति सः चिन्तितवान्। किन्तु सोमनाथः एतावद् धनं निवेशयितुं न इच्छति स्म । यतो हि तेन बालानाम् अध्ययनस्य गृहसञ्चालनस्य च व्ययेन सह चलदूरवाण्यै स्वीकृतम् ऋणम् अपि निर्यातनीयम् आसीत्।

सोमनाथः अतीव बुद्धिमान् आसीत् । सः बालानाम् अध्ययनार्थम् अपि चलदूरवाण्याः उपयोगं कृतवान्। तथा एव चलदूरवाण्याः सहायतया नूतन-कृषि-पद्धतीनां कृषि-योजनानां च विषये ज्ञातवान् । तदर्थं सः ई-चौपाल्, डिजिटल् मंडी इंडिया, एम् किसान् इत्यादीन् तन्त्रकोषान् (एप्) अपि सः चलदूरवाण्याम्




स्रोत: https://play.google.com/store/apps/details?id=com.itcinfotech.echoupal&hl=zu&gl=US

अवतारितवान्। प्रतिदिनं सायङ्काले सोमनाथः एवं च तस्य बालाः दूरभाषाम् उद्घाटयन्ति । स्थानीय-प्रशासनद्वारा याः सहायताः प्राप्यन्ते, तद्-द्वारा स्वीय-कृषिक्षेत्रे कथं प्रगतिः साधयितुं शक्यते इति ते पश्यन्ति । सोमनाथः एम् किसान् तन्त्रकोषम् (एप्) उपयोक्तुम् आरब्धवान्। तत्र वातावरणस्य स्थितिः,

बीजानां साराणां च मूल्यम्, विक्रेय-वस्तूनां मूल्यम् – इत्यादि विवरणं प्राप्यते । तेषां वस्तूनां क्रयणार्थं कियान् धनव्ययः भवति इति सः गणनां कृतवान्। सोमनाथः इदानीं गृहे स्थित्वा एव चलदूरवाणी-द्वारा सर्वम् अपि विवरणं प्राप्नोति।

वातावरणस्य अनियमिततां दृष्ट्वा सः "क्राप् इन्श्यूरेंस् मोबैल् अप्लिकेशन्" इत्यस्मिन् अपि आवेदनं कृतवान्। तेन सः अतीव न्यून-मूल्येन उत्पन्नस्य सस्यस्य सुरक्षानिधिं कारितवान् । यदि केनापि कारणेन उत्पन्नं सस्यं यदि नश्यति तर्हि अधिकाधिकं धनं प्राप्यते । अन्यैः कृषकैः सह सम्भाषणं कर्तुं एवं च नूतनान् विचारान् ज्ञातुं सः ई-चौपाल इत्यस्य अपि उपयोगं कर्तुम् आरब्धवान्। कदाचित् सः जलसेचनार्थं भाटकेन जलयन्त्रं स्वीकर्तुम् उद्युक्तः आसीत् । किन्तु सः एम् किसान् इति तन्त्रकोषेण ज्ञातवान् यत् अग्रिमसप्ताहे महती वृष्टिः भविष्यति इति। अतः सः भाटकेन जलयन्त्रं न स्वीकृतवान्, स्वविवेकन धनस्य रक्षणं च कृतवान्।

सस्यकर्तनस्य कालः यदा सन्निहितः तदा केषुचित् दिनेषु चक्रवातः आगमिष्यति इति चलदूरवाण्यां पूर्वसूचना आगता । ततः पूर्वम् एव सोमनाथः अधिकान् कर्मकरान् आनीय सस्यकर्तनं कारितवान् । अनेन तस्य वर्धितं सस्यं वृष्टेः झञ्झावातात् च रक्षितम्।

सोमनाथः स्वीयं वर्धितं सस्यं संरक्षितुम्, उत्तमं धान्यं च प्राप्तुम् समुचितान् निर्णयान् स्वीकृतवान्। एतत् सर्वं चलदूरवाण्यां विद्यमानं तन्त्रकोषम् उपयुज्य एव सः कर्तुं शक्तवान् । अन्येषां विषयज्ञानां एवं च स्थानीय-प्रशासकानां परामर्शम् अपि सः प्राप्नोति स्म।

चलदूरवाण्याः सहायतया बालाः अपि सम्यग् अध्ययनं कृतवन्तः । तथैव सोमनाथः अपि कृषिद्वारा प्रभूतं धनम् अर्जितवान्। तेन सः दूरभाषायाः ऋणम् अपि प्रत्यर्पितवान् एवं च किञ्चित् धनं बालानाम् अध्ययनाय वित्तकोषे सञ्चितवान्।

## वार्तालापाय

प्रश्नः १. सोमनाथः वर्षाकाले केषां बीजानां वपनं कृतवान् ?

प्रश्नः २. सोमनाथः बीजानां साराणां च समुचितं मूल्यं कथं ज्ञातवान् ?

प्रश्नः ३. सोमनाथः वृष्ट्याः पूर्वं भाटकेन यत् जलयन्त्रं न स्वीकृतवान्, किं तेन तस्य हानिः सञ्जाता ?

प्रश्नः ४. सोमनाथः वातावरणस्य, क्रयणमूल्यस्य, विक्रयणमूल्यस्य च विवरणानि विषयविशेषज्ञैः कथं प्राप्नोति स्म ?

प्रश्नः ५. कृषकाः स्वीयकृषिक्षेत्रे उत्तमं सस्यं प्राप्तुं किं तन्त्रकोषद्वयम् उपयोक्तुं शक्नुवन्ति ?

## मम शब्दाः

**शिक्षक-निर्देशः**— अङ्कीय-साक्षरतायाः विषये चर्चां कुर्वन्तु। सहभागिभिः सह चलदूरवाण्याः विभिन्न-प्रयोगाणां चर्चां कुर्वन्तु।

# अङ्कीय-सङ्ख्याः (डिजिटल्-सङ्ख्याः)

भवान्/भवती धनं निष्कासयितुं वित्तकोषं गच्छति। वित्तकोषः भवते/भवत्यै एकां क्रमसङ्ख्यां ददाति। भवतः/भवत्याः सङ्ख्या अस्ति – द्वादश। एषा सङ्ख्या गवाक्षे स्थापिते एकस्मिन् यन्त्रे एतादृशं दृश्यते।

12

रेलयानस्थानके रेलयानस्य सङ्ख्यां यानपीठिकायाः सङ्ख्यां च प्रदर्शयितुम् अपि एतादृशानाम् अङ्कानाम् एव उपयोगः क्रियते। यथा –

| रेलयान-सङ्ख्या | रेलयानस्य नाम | यान-पीठिकायाः सङ्ख्या |
|---|---|---|
| 12398 | महाबोधि-एक्सप्रेस् | 8 |
| 12454 | राजधानी-एक्सप्रेस् | 5 |

एतादृशाः एव अङ्काः शाकविपण्यां, तापमानं द्रष्टुं, मेट्रो-यानस्य स्थानके इत्यादिषु दृश्यफलके दृश्यन्ते। भवतः/भवत्याः गणनायन्त्रस्य दृश्यफलके अपि एतादृशाः एव अङ्काः भवन्ति।

0 1 2 3 4 5 6 7 8 9

एतेषाम् अङ्कानां ज्ञानम् अपि अति आवश्यकम् अस्ति। यदि भवतः/भवत्याः क्रम-सङ्ख्या अस्ति १२३, तर्हि एषा सङ्ख्या दृश्यफलके कथं दृश्यते इति लिखन्तु –

**शिक्षक-निर्देशः**— सहभागिभ्यः अङ्कीय-सङ्ख्यानां परिचयं कारयतु। तेभ्यः अङ्कीय-सङ्ख्यां पठितुं लेखितुं च विभिन्नान् अभ्यासान् ददातु।

किं भवान् / भवती स्वस्य धान्यानाम् उत्पादनस्य तुलनाम् अन्येषाम् उत्पादनेन सह अथवा गतवर्षस्य स्व-उत्पादनेन सह करोति ? एतादृशीं तुलनां कर्तुं चित्रं बहु उपयोगि भवति।

गीता – "अहो अत्युत्तमम् ! मम सकाशे गोधूमस्य एका गोणी अधिका अस्ति।"



गोधूमस्य गीतायाः षड् गोण्यः

गोधूमस्य नर्मदायाः पञ्च गोण्यः

चित्रं दृष्ट्वा गीता कथम् एतत् अवगतवती ?

गीता ज्ञातुम् इच्छति यत् केन दलेन सर्वकारस्य निर्माणं क्रियते ? इति । गीता दूरदर्शने निर्वाचनस्य वार्ताः पश्यन्ती अस्ति । यदा निर्वाचनस्य परिणामस्य उद्घोषणा भवति तदा दूरदर्शने कानिचन चित्राणि प्रदर्श्यन्ते । तादृशम् एकं चित्रम् अधः प्रदत्तम् अस्ति । अनेन चित्रेण सरलतया अवगन्तुं शक्यते यत् कस्य दलस्य कृते अधिकमतदानम् अभवत् इति ।

**चित्रं दृष्ट्वा वदन्तु**




१. केन दलेन अधिकानि निर्वाचनक्षेत्राणि जितानि ?
२. केन दलेन सर्वतः न्यूनानि निर्वाचनक्षेत्राणि जितानि ?

एवम् एव वयम्, अस्मान् परितः विद्यमानान् विषयान् दृष्ट्वा बहुविधानि विवरणानि ज्ञातुं शक्नुमः। गीता स्वस्य क्षेत्रे विभिन्नानां फलवृक्षाणां रोपणं कृतवती। यथा –




**चित्रं दृष्ट्वा वदन्तु –**

१. क्षेत्रे कस्य फलस्य वृक्षाणां रोपणम् अधिकं कृतम् अस्ति ? ____________

२. केषां वृक्षाणां रोपणं समानपरिमाणे कृतम् अस्ति ? ____________

३. क्षेत्रस्य कस्मिन् भागे आम्रवृक्षाणां रोपणं कृतम् अस्ति ? ____________

गीता दूरदर्शने २०-२० क्रिकेट्-क्रीडां पश्यन्ती अस्ति। अन्तिमेषु षट्सु क्षेपणषट्केषु निर्मितानां धावनाङ्कानां विवरणं चित्रे प्रदर्शितम् अस्ति। –




**चित्रं दृष्ट्वा वदन्तु –**

प्रश्नः१ सर्वाधिकाः धावनाङ्काः कस्मिन् क्षेपणषट्के अर्जिताः ? भवान्/भवती कथं ज्ञातवान् / ज्ञातवती ?

प्रश्नः२ कस्मिन् क्षेपणषट्के सर्वतः न्यूनाः धावनाङ्काः अर्जिताः ?

प्रश्नः३ कस्मिन् क्षेपणषट्के कोऽपि धावनाङ्कः न अर्जितः ?

प्रश्नः४ पञ्चदशे क्षेपणषट्के कति धावनाङ्काः अर्जिताः ?

क्रिकेट्-क्रीडां दृष्ट्वा गीता चलदूरवाण्याः कृते धनापूर्तिं (रिचार्ज्) कर्तुम् एकम् आपणं गतवती। तया अधः प्रदत्तेषु धनापूर्ति-विकल्पेषु एकस्य चयनं करणीयम्। अधः धनापूर्ति-विकल्पस्य मूल्यं समयसीमा च प्रदत्ता अस्ति।

| | | | |
|---|---|---|---|
| धनापूर्ति-विकल्पः | १५५ रूप्यकाणि | १७९ रूप्यकाणि | ४७९ रूप्यकाणि |
| वैधता | २४ दिनानि | २८ दिनानि | ५६ दिनानि |

एतेषु कः धनापूर्ति-विकल्पः गीतायाः लाभाय भवति ?

यदि गीता १७९ रूप्यकाणां धनापूर्तिं कारयितुम् आपणिकाय ५०० रूप्यकाणि ददाति, तर्हि आपणिकः गीतायै शेषं कियत् धनं प्रत्यर्पयति ?

गीता मार्च्-मासस्य १८ दिनाङ्के धनापूर्तिं कारितवती। तस्य धनापूर्ति-विकल्पस्य २८ दिनानां वैधता अस्ति। तर्हि गीता अग्रिमां धनापूर्तिं कदा करिष्यति ?

| मार्च्-मासः | | | | | | |
|---|---|---|---|---|---|---|
| रविवासरः | सोमवासरः | मङ्गलवासरः | बुधवासरः | गुरुवासरः | शुक्रवासरः | शनिवासरः |
| | | १ | २ | ३ | ४ | ५ |
| ६ | ७ | ८ | ९ | १० | ११ | १२ |
| १३ | १४ | १५ | १६ | १७ | १८ | १९ |
| २० | २१ | २२ | २३ | २४ | २५ | २६ |
| २७ | २८ | २९ | ३० | ३१ | | |

| अप्रिल्-मासः | | | | | | |
|---|---|---|---|---|---|---|
| रविवासरः | सोमवासरः | मङ्गलवासरः | बुधवासरः | गुरुवासरः | शुक्रवासरः | शनिवासरः |
| | | | | | १ | २ |
| ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| १० | ११ | १२ | १३ | १४ | १५ | १६ |
| १७ | १८ | १९ | २० | २१ | २२ | २३ |
| २४ | २५ | २६ | २७ | २८ | २९ | ३० |

# चलदूरवाण्याः लोकः

निशा जनकस्य वित्तकोषस्य लेखां चलदूरवाण्याः सङ्ख्यया संयोजितवती। सा जनकं दूरवाणी-द्वारा विद्युतः व्ययपत्रक-पूर्तिं, दूरवाण्याः धनापूर्तिं च कर्तुं शिक्षितवती । अधुना तस्याः पिता दूरवाण्या सर्वविध-व्ययपत्रकाणि पूरयति । तदर्थं यत् धनम् अपेक्षितं तत् साक्षात् तस्य वित्तकोषस्य लेखातः स्थानान्तरितं जायते । अनेन तस्याः जनकस्य कृते व्ययपत्रक-पूर्त्यर्थं विद्युद्-विभागादीनां कार्यालयं प्रति गमन-आगमन-समस्या अपहृता ।

अवकाशात् परं निशा नगरं गतवती । सा नगरे पठति स्म । यदा कदा सा स्वस्य महाविद्यालस्य भावचित्राणि चलच्चित्राणि च प्रेषयति स्म । तस्याः जनकः तया प्रेषितानि सर्वाणि भावचित्राणि चलच्चित्राणि च उत्सुकतया पश्यति स्म । वाट्स्-एप् द्वारा सः स्वविचारान् सन्देशमाध्यमेन प्रेषयति स्म । अधुना जनकः पत्राणां स्थाने ई-पत्रं (ई-मेल्) प्रेषयति । अनेन पत्रप्रेषणार्थं क्रियमाणः व्ययः समयः च न्यूनः जायते ।




एकदा निशा स्वजनकं प्रति दृश्याह्वानं (वीडियो-कॉल्)

कृतवती । तस्याः जनकः ताम् उक्तवान् “अद्यतनेषु अहं यू-ट्यूब् माध्यमेन लोकगीतानि श्रुत्वा एव निद्रां करोमि। अहं तु अधुना सर्वविधाः वार्तावाहिनीः यू-ट्यूब् माध्यमेन एव पश्यामि।”

निशा उक्तवती “बहु उत्तमं तात ! भवान् तु तन्त्रनिपुणः जातः। बहु उत्तमम्। तात ! कोऽपि भवतः स्वचालित-धन-यन्त्र-सङ्ख्यां (ए.टी.एम्. सङ्ख्या) तु न पृष्टवान् खलु !”

निशायाः जनकः उक्तवान् “आम्, एकदा कश्चन पृष्टवान्। परन्तु अहं न उक्तवान्। यदि अहम् उक्तवान् स्यां तर्हि सः स्वचालित-धन-यन्त्र-पत्रस्य (ए.टी. एम् कार्ड् इत्यस्य) कूटसङ्ख्यां पृष्ट्वा मम सर्वं धनं निष्कासयेत्। अहं तु जागरूकः आसम्।”

निशा उक्तवती “अत्युत्तमं तात ! भवान् आन्तर्जालिक-वञ्चकेभ्यः कथं सुरक्षितः भवितव्यः इति अपि ज्ञातवान्।”

निशायाः जनकः सहर्षं निशाम् उक्तवान् “नगरे यदि कुत्रचित् गमन-आगमनं करणीयं तर्हि भाटकयानस्य अथवा बैक्-यानस्य आरक्षणं करोतु । अपेक्षितानि पुस्तकानि अपि चलदूरवाण्या क्रेतुं शक्नोति । अनेके तन्त्रकोषाः सन्ति। गूगल् इत्यत्र अन्वेषणेन तेषां विवरणानि प्राप्यन्ते। अन्तर्जालीय-पुस्तकालये अपि पुस्तकानि अन्विष्य पठितुं शक्नोति।”

“मम जनकः तु चलदूरवाण्याः विषये अधिकानि विवरणानि ज्ञातवान्” इति चिन्तयन्ती निशा स्मितवती।

तत्पश्चात् निशा दृश्याह्वानेन एव जनकं महाविद्यालयं प्रदर्शितवती। जनकः अपि निशां गोधूमस्य क्षेत्रं, तडागं च प्रदर्शितवान्। तडागे न्यूनम् एव जलम् आसीत्।

निशायाः जनकः एवम् अनुभूतवान् यत् सः नगरे स्वपुत्र्याः निकटे एव अस्ति इति। निशा अपि अनुभूतवती यत् सा ग्रामस्य क्षेत्रे तडागे च अस्ति इति।

## वार्तालापाय

प्रश्नः १. निशा जनकं चलदूरवाण्या किं किं शिक्षितवती ?

प्रश्नः २. जनकः निशां चलदूरवाण्याः उपयोगस्य विषये किं किम् उक्तवान् ?

प्रश्नः ३. चलदूरवाण्या निशा-जनकयोः मध्ये दूरता कथं निकटता अपगता ? किं कदाचित् भवान् / भवती अपि चलदूरवाण्या दूरस्थेन केनचित् परिचितेन साकं निकटताम् अनुभूतवान् / अनुभूतवती ? यदि एवम् अस्ति तर्हि तम् अनुभवं सर्वान् वदन्तु ।

प्रश्नः ४. चलदूरवाण्याः आन्तर्जालिक-वञ्चकानां विषये अत्यधिकं श्रूयते । आन्तर्जालिक-वञ्चनात् सुरक्षितः भवितुं किं किं करणीयम् ?

## पठतु, वदतु लिखतु च

अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखतु ।

प्रश्नः १. चलदूरवाण्याः के के लाभाः सन्ति ?

प्रश्नः २. चलदूरवाण्याः उपयोगसमये केषु विषयेषु अवधानम् अपेक्षितम् ?

प्रश्नः ३. चलदूरवाण्या केषां विनिमयः कर्तुं शक्यते ? समीचीनस्य उत्तरस्य पुरतः (✓) इति चिह्नं स्थापयतु ।

अ. धनस्य

आ. सन्देशानाम्

इ. चित्राणाम्

ई. उपर्युक्तानाम् त्रयाणाम्

**भवान्/भवती स्वस्य चलदूरवाण्याः उपयोगं किमर्थं करोति इति सूचीं करोतु ।**

**किं कदापि चलदूरवाण्या कार्यकरणे भवान्/भवती महत् सौकर्यम् अनुभूतवान्/अनुभूतवती वा ?**

## चलदूरवाण्याः अन्ये केचन उपयोगाः

- संक्षिप्त-सन्देश-सेवा (एस्.एम्.एस्) द्वारा सन्देशं प्रेषणम् ।
- गणनायन्त्रस्य सहायतया गणना ।
- जागरणार्थं प्रबोधन-घट्याः उपयोगः ।
- दिनदर्शिकायाः उपयोगः ।
- विभिन्नैः तन्त्रकोषैः भवान्/भवती पद्भ्यां कियत् चलितवान्/ चलितवती इत्यस्य अवलोकनम् ।
- चलदूरवाण्या अध्ययनम् । (चलदूरवाण्यां केषाञ्चित् विशेषाणां तन्त्रकोषाणां माध्यमेन साक्षात् कक्षायां योजयितुं शक्यते । तादृशानां केषाञ्चन तन्त्रकोषाणां नामानि सन्ति – ज़ूम् मीटिङ्ग्, गूगल् मीट्, मैक्रोसोफ़्ट् टीम्स् इत्यादीनि । एतेषु तन्त्रकोषेषु भवता/भवत्या प्रथमं पञ्जीकरणं करणीयम् ।)
- वैश्विक-स्थान-निर्धारण-प्रणाल्या (जी.पी.एस्/लोकेशन्) समीचीनदिशः मार्गस्य च ज्ञानम् ।
- चलदूरवाण्यां विभिन्नानां क्रीडाणां क्रीडणम् ।
- फ़ेस्बुक् इत्यस्य उपयोगः ।
- आकाशवाण्याः (रेडियो) श्रवणम् ।
- ध्वनिमुद्रणम्।
- गीतगानं, कथावाचनम् इत्यादीनां चलच्चित्रनिर्माणम् ।
- तापमानस्य अवलोकनम् ।
- निकटस्थाः भोजनालयाः पथिशालाः चिकित्सालयाः विद्यालयाः रेलस्थानकानि उद्यानानि इत्यादीनां ज्ञानम् ।

## ■ पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु ।

अधः प्रदत्तेषु भवान्/भवती स्वस्य चलदूरवाण्यां केषाम् उपयोगं करोति ? समीचीन-उत्तरस्य पुरतः (✓) इति चिह्नं स्थापयतु ।



घटी




दिनदर्शिका

वाट्स्-एप्



संक्षिप्त-सन्देश-सेवा



गणकयन्त्रम्

गूगल्-मेप्

यू-ट्यूब्




ई-पत्रम्

फ़ेसबुक



संपर्क-सूची

DIKSHA

दीक्षा



करदीपः

**शिक्षक-निर्देशः** — सहभागिनः प्रत्येकं चित्रस्य परिचयं कारयन्तु । चित्रस्य अधः लिखितं शब्दं वक्तुं प्रेरयन्तु । एतेषाम् उपयोगस्य विषये चर्चां कुर्वन्तु । केचन सहभागिनः एतैः वस्तुभिः सह परिचिताः न स्युः, प्रयोगं कर्तुम् अपि न जानीयुः ।

# अन्तर्जालीय-सुरक्षायाः ज्ञानम् (साइबर-सुरक्षा)












दशम-सप्ताहः
१०

सहायता-सङ्ख्या
**1930**




**वञ्चन-सन्देशेषु विद्यमानानि सूत्राणि (लिङ्क्स) न उद्घाटयन्तु ।**

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=booklet-on-cyber-safetysecurity&ln=en&ln=en

एकादश-सप्ताहः
११

सहायता-सङ्ख्या
**1930**




**भवान्/भवती अन्तर्जाले यत् किमपि पठति तेषु सर्वेषु विश्वासं न करोतु ।**

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=booklet-on-cyber-safetysecurity&ln=en&ln=en

चतुर्दश-सप्ताहः
१४

सहायता-सङ्ख्या
**1930**



**वैयक्तिक-भावचित्राणाम् अन्तर्जाल-माध्यमेन प्रेषणं सम्यक् विचिन्त्य एव करोतु ।**

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=booklet-on-cyber-safetysecurity&ln=en&ln=en

विंशतितम-सप्ताहः
२०

सहायता-सङ्ख्या
**1930**




**यदि भवान्/भवती आन्तर्जालिक-अपराधेन पीडितः जातः/जाता तर्हि अवश्यं तस्य प्रतिवेदनं करोतु ।**

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=booklet-on-cyber-safetysecurity&ln=en&ln=en













**शिक्षक-निर्देशः—** प्रदत्तचित्रैः सहभागिनः अन्तर्जालीय-सुरक्षायाः विषयं बोधयामः । सहभागिभिः सह 'नेटिकेट्' अर्थात् अन्तर्जालीय-शिष्टाचारस्य विषये चर्चां कुर्मः । एतदर्थम् अधः प्रदत्तस्य सूत्रस्य उपयोगं कर्तुं शक्नुमः। https://ciet.nic.in/flipbook/200-COPY-Cyber-Safety-Pocket-Book-HINDI-W-3-5inch-X-H-5inch/index.html#page=1

# वर्णमाला

## स्वरवर्णाः

अ आ इ ई उ ऊ ऋ ॠ ऌ

ए ऐ ओ औ

अं अनुस्वारः अः विसर्गः

## व्यञ्जनवर्णाः

| | | | | | |
|---|---|---|---|---|---|
| क | ख | ग | घ | ङ | स्पर्श-वर्णाः |
| च | छ | ज | झ | ञ | |
| ट | ठ | ड | ढ | ण | |
| त | थ | द | ध | न | |
| प | फ | ब | भ | म | |
| य | व | र | ल | | अन्तःस्थ-वर्णाः |
| श | ष | स | ह | | ऊष्म-वर्णाः |

## संयुक्तवर्णाः

क्ष त्र ज्ञ श्र द्य